# 7

# सन्धिः

**अस्माभिः पठितं यत् वर्णानां संयोजनेन शब्दरचना भवति। क्वचित् क्वचिद् वर्णसंयोजनेन वर्णरूपेषु परिवर्तनमपि जायते।**

**यथा —**

| | | | |
|---|---|---|---|
| सूर्य + आतपे | = | सूर्यातपे | स्वर-सन्धिः |
| प्रत्यवदत् | = | प्रति + अवदत् | |
| तत् + अनन्तरम् | = | तदनन्तरम् | व्यञ्जन-सन्धिः |
| तस्मिन्नेव | = | तस्मिन् + एव | |
| तस्याः + च | = | तस्याश्च | विसर्ग-सन्धिः |
| नृपोऽवदत् | = | नृपः + अवदत् | |

**एतत् वर्णपरिवर्तनमेव सन्धिः, वरिवर्तितवर्णानां मूलरूपेषु पुनः आनयनं च सन्धिविच्छेदः। अधुना विस्तरेण जानीम : —**

**1. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत —**

**(क)** अ, आ + अ, आ = आ

i. सूर्य + आतपे = सूर्यातपे (अ+आ=आ)

ii. लोभ + आविष्टा = ........................ (........................)

iii. आगतास्ति = ........................ + ........................ (........................)

iv. एव + अस्य = ........................ (........................)

v. पूर्वार्द्धः ........................ = ........................ (........................)

**(ख)** इ, ई + इ, ई = ई

i. अति + इव = अतीव (इ+इ=ई)

ii. नदी + इयम् = ........................ (........................)

iii. कपि + ईदृशः = ........................ (........................)

© NCERT not to be republished

iv. लघ्वीति = .................... + .................... (....................)

v. कपीन्द्रः = .................... + .................... (....................)

**(ग)** उ, ऊ + उ, ऊ = ऊ

i. गुरु + उचितम् = गुरूचितम् (उ+उ=ऊ)

ii. भानु + उदयः = .................... (....................)

iii. लघूर्मिः .................... + .................... (....................)

iv. भू + ऊर्ध्वम् = .................... (....................)

v. साधूपदेशः = .................... + .................... (....................)

**(घ)** ऋ, ॠ + ऋ, ॠ = ॠ

i. पितृ + ऋणम् = पितॄणम् (ऋ+ऋ=ॠ)

ii. मातृ + ऋद्धिः = .................... (....................)

iii. भ्रातॄणम् .................... + .................... (....................)

| |
|---|
| 'अकः सवर्णे दीर्घः', इति सूत्रेण समान-स्वरवर्णयोः दीर्घादेशः भवति। एषः 'दीर्घसन्धिः' इति कथ्यते। |

**2. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत —**

**(क)** अ, आ + इ, ई = ए

i. अनेन + इति = अनेनेति (अ+इ=ए)

ii. यथा + इच्छया= .................... (....................)

iii. मातेव = .................... + .................... (....................)

iv. लतेयम् = .................... + .................... (....................)

**(ख)** अ, आ + उ, ऊ = ओ

i. वृक्षस्य + उपरि= वृक्षस्योपरि (अ+उ=ओ)

ii. सूर्योदयात् = .................... + .................... (....................)

iii. घृत+ उत्पत्तिः = .................... (....................)

iv. मानवोचितम् = .................... + .................... (....................)

v. गृह + उद्यानम् = .................... (....................)





© NCERT not to be republished

(ग) अ, आ + ऋ, ॠ = अर्

i. महा + ऋषि: = महर्षि: (आ+ऋ=अर्)

ii. देवर्षि: = ........................ + ........................ (........................)

iii. वसन्त + ऋतु:= ........................ (........................)

iv. वर्षर्तु: = ........................ + ........................ (........................)

‘आद् गुण:’ इति सूत्रेण अ-आ-वर्णयो:, इ,ई उ,ऊ/ऋ, ॠ वर्णाभ्यां सह मेलनेन क्रमश:-ऐ, ओ, अर् इति भवन्ति। एष: गुणसन्धि: इति कथ्यते।

**3. यथापेक्षितं सन्धिं विच्छेदं वा कुरुत —**

**(क)** अ, आ + ए, ऐ = ऐ

i. गत्वा + एव = गत्वैव (आ+ए=ऐ)

ii. एव + एनम् = ........................ (........................)

iii. क्षणेनैव = ........................ + ........................ (........................)

iv. न + एतादृश: = ........................ (........................)

v. महैरावत: = ........................ + ........................ (........................)

**(ख)** अ, आ + ओ, औ = औ

i. जल + ओघ: = जलौघ: (अ+ओ=औ)

ii. तव + औदार्यम्= ........................ (........................)

iii. वनौषधि: = ........................ + ........................ (........................)

iv. महा + औत्सुक्येन= ........................ (........................)

v. जनौघ: = ........................ + ........................ (........................)

**‘वृद्धिरेचि’ इति सूत्रानुसारेण अ,आ वर्णयो: क्रमश: ए, ऐ/ओ, औ वर्णाभ्याम् सह मेलने जाते क्रमश: ‘ऐ’, ‘औ’ इति भवति। एष: ‘वृद्धिसन्धि:’ इति कथ्यते।**

© NCERT not to be republished







अधिकारः (अधि + ............)

अधिगमः (अधि + ............)

अधिकरणम् (............+ करणम्)

अधिरोहति (............ + रोहति)

आचारः (आ + ............)

आधारः (आ + ............)

आहारः (आ + ............)

आगमनम् (आ + ............)

**4. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत—**

**(क)** इ, ई + असमान-स्वरः= इ, ई स्थाने य् + स्वरः

i. प्रति + अवदत्= प्रत्यवदत् (इ+अ=य)

ii. यदि + अहम् = ............ (............)

iii. तानि + एव = ............ (............)

iv. पर्यावरणम् = ............ + ............ (............)

v. इत्यवदत् = ............ + ............ (............)

**(ख)** उ, ऊ + असमानः स्वरः= उ, ऊ स्थाने व् + स्वरः

i. खलु + अयम् = खल्वयम् (उ+अ=व)

ii. मधु + अरिः = ............ (............)

iii. गुणेष्वेव = ............ (............)

iv. विरमन्तु + एते = ............ + ............ (............)

v. स्वागतम् = ............ + ............ (............)

**(ग)** ऋ, ॠ + असमान-स्वरः= ऋ स्थाने र् + स्वरः

i. पितृ+ आदेशः= पित्रादेशः (ऋ+आ=रा)

© NCERT not to be republished

ii. मात्राज्ञा = ........................ + ........................ (........................)

iii. भ्रातृ + इच्छा = ........................ (........................)

iv. कर्तृ + उपदेश: = ........................ (........................)

v. पित्रनुमति: = ........................ + ........................ (........................)

| |
|---|
| **'इको यणचि' सूत्रानुसारम् इ, ई/उ, ऊ/ ऋ, ॠ स्वराणाम् असमानस्वरेण सह मेलनेन इ, ई/उ,ऊ/ऋ, ॠ वर्णानां स्थाने क्रमश: य्, व्, र् इति भवन्ति, परवर्ती स्वर: च एतै: सह मात्रारूपेण प्रयुज्यते।** |

**5. उदाहरणमनुसृत्य सन्धिं विच्छेदं वा कुरुत —**

**(क)**

| |
|---|
| म् + व्यञ्जनवर्ण: = म् स्थाने अनुस्वार: |
| म् + स्वर: = म् वर्णे स्वरस्य संयोग: |

i. त्वम् + यासि = त्वं यासि (संधि:)

ii. अहम् + इच्छामि = ........................ (........................)

iii. किम्+ कथयति = ........................ (........................)

iv. अयम् + राजा = ........................ (........................)

v. माम् + मुञ्च = ........................ (........................)

vi. कथमागत: = ........................ + ........................ (........................)

vii. अयम् +राजा = ........................ (........................)

viii. हर्तुम् +इच्छति = ........................ (........................)

ix. सन्ध्याम् + यावत् = ........................ (........................)

| |
|---|
| 'मोऽनुस्वार:' इति सूत्रानुसारं 'म्' इति वर्णस्य पश्चात् यदि कोऽपि व्यञ्जनवर्ण: भवति तर्हि 'म्' वर्णस्य स्थाने अनुस्वार: भवति। |





© NCERT not to be republished

## अभ्यास:

1. प्रदत्त-पदेषु सन्धिं विच्छेदं वा कुरुत —

i. हिताहितम् = .................... + ....................

ii. पश्चिमोत्तरम् = .................... + ....................

iii. वृथा + अटनम् = ....................

iv. इति + उभौ = ....................

v. नमाम्येनम् = .................... + ....................

vi. वृकोदरेण = .................... + ....................

vii. राजमार्गेण + एव= ....................

viii. इहागत: = .................... + ....................

ix. पूर्व + इतरम् = ....................

x. वदतीति = .................... + ....................

xi. तव + औषधम् = ....................

xii. राजर्षि: = .................... + ....................

xiii. अत्रान्तरम् = .................... + ....................

xiv. अहम् + गच्छामि = ....................

xv. खलु + एष: = ....................

xvi. साधूक्तम् = .................... + ....................

xvii. मातृ + ऋणम् = ....................



© NCERT not to be republished